ISSN 2348-7828

# व्यञ्जना अनुमानं च

✎ आचार्यः जी. यस्. आर्. कृष्णमूर्तिः

**वैदर्भीजानिरसकृत्पाञ्चालीजानिपूजितः।**

**गौडीं रीतिं सुमधुरां दद्यान्नः नन्दनन्दनः।।**[१]

महाभारते उद्योगपर्वणः अवान्तरपर्वणि प्रजागरनामके विदुरनीतौ एकः ग्रन्थिश्लोको वर्तते यस्य व्याख्यानं तत्तद्दर्शनानुसारं शास्त्रानुसारं च अकारि व्याख्याकारैः, तथैव साहित्यशास्त्रपरतया व्याख्यातम् अस्मद्गुरुचरणैः सोमंच्युपाह्वैः बलरामकृष्णशास्त्रिभिः स्वीकायायां बालबोधिनीव्याख्यायां[२] यच्च मम लघुध्वन्यालोकस्य गुरुकृपाव्याख्यायाः भूमिकायाम् उद्धृतम्-

यथा-

**एकया द्वे विनिश्चित्य त्रींश्चतुर्भिः वशे कुरु।**

**पञ्च जित्वा षड्विदित्वा सप्त हित्वा सुखी भव।।**[३]

एकया काव्यैकबुद्ध्या द्वे तद्गतपद-पदार्थजाते विनिश्चित्य सम्यग्ज्ञात्वा चतुर्भिः अभिधा-तात्पर्य-लक्षणा-व्यञ्जना-व्यापारैः त्रीन् वाच्य-लक्ष्य-व्यङ्ग्यान् अर्थान् वशे स्वाधीने कुरु, तदर्थजातज्ञानेन पञ्च आन्वीक्षिकी-त्रयी-वार्ता-दण्डनीति-साहित्यविद्याः[४] जित्वा उत्तीर्य षट् पुनः, साहित्यशास्त्रे षट् रसालंकार-रीति-ध्वनि-वक्रोक्त्यौचित्यसंप्रदायान् विदित्वा बुद्ध्वा सप्त मृगया-स्त्री-मद्य-द्यूत-वाक्पारुष्य-दण्डपारुष्यार्थदूषणनामानि सप्तव्यसनानि हित्वा त्यक्त्वा सुखी भव निरतिशयरसास्वादमग्नो भव[५] इति साहित्यशास्त्र-दृष्ट्या व्याख्यातम्। तथा च सूक्तं-**काव्यशास्त्रविनोदेन कालो गच्छति धीमताम्। व्यसनेन च मूर्खाणां निद्रया व्यसनेन च** इति। अत्र काव्यशास्त्रं नाम साहित्यशास्त्रम्। आलंकारिकसंप्रदायेषु ध्वनिसंप्रदायः अन्यतमः, यश्च सहृदयानन्दवर्धनेन आनन्दवर्धनेन प्रतिष्ठापितः। तत्र तैः ध्वनिशब्दः चतुर्षु अर्थेषु प्रयुक्तः यथा-

**ध्वनिशब्दस्य व्युत्पत्तिः तदर्थविवेचनम्-**

**ध्वन[६]धातोः भौवादिकात् खनिकस्यज्यसिवसि इत्यादिना औणादिके इप्रत्यये[७]**

**कर्तृविवक्षायां[८] ध्वनति इति व्युत्पत्त्या ध्वनिः-व्यञ्जकः शब्दः अर्थश्च।**

**कर्मविवक्षायां[९] ध्वन्यते इति व्युत्पत्या ध्वनिः व्यङ्ग्यः अर्थः प्रतीयमानः।**

**भावविवक्षायां[१०] ध्वन्यते इति व्युत्पत्त्या ध्वननं ध्वनिः व्यापारः नाम व्यञ्जनाव्यापारः।**

**अधिकरणविवक्षायां[११] ध्वन्येत अस्मिन् इति व्युत्पत्या काव्यविशेषः इति अर्थेषु।**

**एवं लोचनव्याख्यायाम् अभिनवनवगुप्तेन व्याख्यायि।**[१२]

अत एव ध्वनिकारः ध्वन्यालोकम् उद्द्योतनाम्ना चतुर्धा व्यञ्जना-व्यङ्ग्य-व्यञ्जक-व्यङ्ग्यात्मककाव्यभेदेन विभज्य चतुर्षु उद्द्योतेषु क्रमशः प्रथमे-व्यञ्जना, द्वितीये-व्यङ्ग्यः, तृतीये-व्यञ्जकः, चतुर्थे-व्यङ्ग्यात्मकं काव्यं च न्यरुपिषत।

तथा च ध्वननमेव व्यञ्जना। व्यापारो नाम शक्तिः।

**व्यञ्जनाशब्दस्य व्युत्पत्तिः अर्थश्च**-वि इति उपसर्गात् अञ्जू व्यक्तिम्रक्षकान्तिगतिषु[१३] इति धातोः णिजन्तात् ''ण्यासस्रन्थो युच्''[१४] इति सूत्रेण भावे युचि प्रत्यये स्त्रीत्वविवक्षायां टापि[१५] च व्यञ्जना शब्दस्य व्युत्पत्तिः।

सम्बन्धवृत्तित्वपक्षे करणे[१६] अभिधालक्षणाव्यापारभ्यामन्यः तृतीयः शब्दव्यापारः।

अर्थादिध्वनिरागचेष्टादीनां व्यञ्जना प्रथमः व्यापारः।

**व्यञ्जनालक्षणविमर्शः**-यद्यपि ध्वनिकारादिभिः तदनुयायिभिः अभिनवगुप्तं विहाय जगन्नाथादिभिरपि व्यञ्जनायां प्रभञ्जनं कृतम्। अन्य समग्रलक्षणकरणे मौनिनः।

समनन्तरवर्ती लोचनकारः ध्वननस्य पर्यायपदानि ध्वनन-द्योतन-व्यञ्जन-प्रत्यायनावगनादि-सोदरव्यपदेशनिरूपितः अभ्युपगन्तव्यः।[१७] इत्यवोचत्।

**काव्यप्रकाशे व्यञ्जनालक्षणप्रस्तावः-**

मम्मटेनापि द्वितीयोल्लासे व्यञ्जनम्, अञ्जनं, व्यक्तिः इति एवमेव अभाणि।[१८] परं लोचनकारस्य पूर्वपङ्क्तिं स्मारयता लक्षणामूल-व्यञ्जनायाः स्थापनासमये-

**व्यापारो व्यञ्जनात्मकः**, इति,

**फले शब्दैकगम्येऽत्र व्यञ्जनान्नापरा क्रिया।**[१९]

इति च व्यञ्जनशब्दः प्रायोजि।

तथैव शब्दशक्तिमूलव्यञ्जनानिरूपणसन्दर्भे अञ्जनशब्देन व्यञ्जना निरदेशि।

**अनेकार्थस्य शब्दस्य वाचकत्वे नियन्त्रिते।**

**संयोगाद्यैरवाच्यार्थधीकृद्व्यापृतिरञ्जनम्।। इति।**[२०]

पुनरपरत्र आर्थीव्यञ्जनानिरूपणावसरे व्यक्तिः व्यापारः इति निरदेशि।

**वक्तृबोद्धव्यकाकूनां वाक्यवाच्यान्यसंनिधेः।**

**प्रस्तावदेशकालादेः वैशिष्ट्यात्प्रतिभाजुषाम्।**

**योऽर्थस्यान्यार्थधीहेतुः व्यापारो व्यक्तिरेव सा।।इति।**[११]

एवं तत्रापि व्यञ्जनायां सामान्यलक्षणं निष्कृष्टतया न प्रत्यपादि।

पण्डितराजेनापि ध्वनिभेदनिरूपणसन्दर्भे अभिधालक्षणयोः लक्षणं प्रतिपाद्य व्यञ्जनालक्षणं न निरूपितम्।

**विद्यानाथस्य व्यञ्जनालक्षणविमर्शः-**

ततः परं ध्वनिं समर्थयत्सु आचार्येषु मम्मटाभिनवगुप्तयोः हृदयमनुसरत्सु सर्वप्रथमं विद्यानाथः स्वकीये प्रतापरुद्रयशोभूषणे व्यञ्जनां लक्षयितुमुपक्रान्तवान् यथा-

**अन्वितेषु पदार्थेषु वाक्यार्थोपस्कारार्थमर्थान्तरविषयः**

**शब्दव्यापारो व्यञ्जनावृत्तिः।**[२२]

पदार्थेषु अन्वितेषु आकाङ्क्षादिवशात् मिथः सम्बद्धेषु सत्सु, वाक्यार्थे प्रतीते, प्रकरणादिना प्राकरिणिकार्थपर्यवसितेषु वाक्यार्थस्य काव्यशरीरभूतस्य उपस्कारार्थं शोभार्थम् अर्थान्तरविषयः शब्दव्यापारः व्यञ्जना इति समन्वयः। तथा सति अभिधायाः सति सम्भवे लक्षणायाश्च अनन्तरभावी व्यञ्जनाव्यापारः इति फलितोऽर्थः।

सा च द्विधा-अभिधामूला, लक्षणामूला चेति।

अभिधामूलाया यथा शब्दशक्तिमूलायाः-

**वाहिन्यः काकतीन्द्रस्य सर्वतोमुखसम्भ्रमाः।**

**कर्वन्त्युद्यत्कबन्धाढ्यं प्रतिपक्षबलार्णवम्।।**[२३]

अत्र वाहिनीसर्वतोमुखकबन्धशब्दानामर्थप्रकरणादिना वाचकत्वे नियन्त्रितेऽपि नदीजलप्रतिपत्तिः यतः जायते सा व्यञ्जना वृत्तिः।

**अर्थशक्तिमूलव्यञ्जनायाः-**

**श्रुत्वा काकतिभूभर्तुः क्षोणीपाणिग्रहोत्सवम्।**

**अङ्गुष्ठेनालिखन् भूपाः पादपीठीं नताननाः।।**[२४]

अत्र भूपाः विषण्णा इति अर्थशक्त्या व्यज्यते।

**जेतुः काकतिभूभर्तुराकर्ण्य पटहध्वनिम्।**

**सामन्तनगराण्युच्चैराक्रोशन्ति समन्ततः।।**

(प्र. रु. का. प्र. श्लो. ३२)

इत्यत्र जहल्लणया नगरवासिनः लक्ष्यन्ते।

अत्यन्ततिरस्कृतवाच्यव्यञ्जनायां तत्रत्यप्राणिमात्रभयप्रतीतिः व्यङ्ग्या काव्यशोभां करोति इति लक्षणसमन्वयः।

एवमुभयशक्तिमूलव्यञ्जनायां असंलक्ष्यक्रमव्यञ्जनायामपि लक्षणसमन्वयः वेदितव्यः।

यथा **विजितारिपुरो मूर्तौ**[२५] इत्यादिषु, **शृण्वती प्रियसन्देशं प्रेयसः काकतीशितुः**[२६] इत्यादिषु ज्ञातव्यम्।

**तल्लक्षणे विप्रतिपत्तयः-**

अत्र विचार्यते-

एवं पुर्वोक्तस्य विद्यानाथेन कृतस्य व्यञ्जनालक्षणस्य स्वीकारे गङ्गायां घोषः इत्यत्र प्रयोजनस्य पावनत्वादेः काव्यशोभाकरत्वाभावात् तस्य लक्षणस्य अव्याप्तिः इति प्रथमो दोषः।

किंच कुरु रुचिम् इत्यत्र पदयोः वैपरीत्ये काव्यान्तर्वर्तिनि कथं दुष्टत्वम् इति पर्यनुयुक्तवता मम्मटेन तत्रापि व्यञ्जनाया विलासः अस्तीति प्रत्यपादि, किन्तु तत्र विद्यानाथस्य लक्षणमव्याप्तम् अश्लीलत्वदोषस्य काव्यशोभाकरत्वाभावात् इति द्वितीयो दोषः।

एवम् **आसनम् अलंक्रियताम्** इति पदविभागाभावेऽपि द्रष्टव्यम्।

व्यङ्ग्यस्य इयत्तया अनिश्चिततत्वात् निमित्तस्य अनुपादानात् **गतोऽस्तमर्कः** इत्यार्थ्यां व्यञ्जनायामव्याप्तिः इति **तृतीयो दोषः।**

नादवर्णचेष्टादीनां व्यञ्जकत्वे पुनः लक्षणमव्याप्तं तेषां वृत्तिवेद्यत्वाभावात्, तेषामपि ध्वनिकारादिभिः व्यञ्जकत्वस्वीकारात् इति **चतुर्थो दोषः।**

**विश्वनाथस्य व्यञ्जनालक्षणविमर्शः-**

तदनु समागतः विश्वनाथः पूर्वोक्तदोषान् परिहर्तुं चेष्टते यथा-

**विरतास्वाभिधाद्यासु ययार्थो बोध्यते परः।**

**सा शक्तिर्व्यञ्जना नाम शब्दस्यार्थादिकस्य च।**

**अभिधालक्षणामूला शब्दस्य व्यञ्जना द्विधा।।**[१७]

अभिधाद्यासु स्वं स्वमर्थं बोधयित्वा विरतासु विश्रान्तासु यया शक्त्या अर्थान्तरस्य प्रतीतिः जायते सा व्यञ्जना शक्तिरिति कारिकायाः अर्थः।

इयं व्यञ्जना शब्दे तदैकदेशप्रकृतिप्रत्ययादौ अर्थे वाक्ये प्रबन्धे नादवर्णचेष्टादिषु च वर्तते इति पिण्डितार्थः।

**विश्वनाथलक्षणस्वीकारे विद्यानाथव्यञ्जनालक्षण-दोषनिराकरणम्-**

**गङ्गायां घोषः** इत्यत्र लक्षणे वाक्यार्थोपस्कारार्थमिति पदस्य अभावात्, तस्य प्रयोजनांशप्रतिपादकव्यञ्जनायां न अव्याप्तिः इति **प्रथमः दोषः निवारितः।**

**कुरु रुचिम्** इत्यत्र व्यत्यस्तपदे अर्थसामान्यवचनात् अश्लीलादौ अपि व्यञ्जनाया उल्लासः इति **द्वितीयो दोषः परिहृतः।**

आर्थव्यञ्जनायामपि अर्थादिकस्य इति पदप्रयोगात् **तृतीयः दोषः अपि निरस्तः।**

**विश्वनाथस्य व्यञ्जनालक्षणसमन्वयः-**

शब्दशिक्तिमूला व्यञ्जना यथा-

**दुर्गालङ्घितविग्रहो मनसिजं सम्मीलयंस्तेजसा**
**प्रोद्यद्राजकलो गृहीतगरिमा विष्वग्वृतो भोगिभिः।**
**नक्षत्रेशकृतेक्षणो गिरिगुरौ गाढां रुचिं धारयन्**
**गामाक्रम्य विभूतभूषिततनू राजत्युमावल्लभः।।**[१८]

अत्र उमावल्लभ इति राज्ञः स्तुतिः प्राकरणिकी, श्लिष्टविशेषणैः अप्राकरिणिकः अर्थः अपि स्फुरति व्यञ्जनया इति लक्षणसमन्वयः।

आर्थ्याः व्यञ्जनायाः यथा-

**गुरुपरतन्त्रतया बत दूरतरं देशमुद्यतो गन्तुम्।**
**अलिकुलकोकिलललिते नैष्यति सखि सुरभिसमये-ऽसौ।।**[१९]

अत्र नैष्यति, अपि तर्हि एष्यत्येव इति व्यङ्ग्यस्य प्रतीतिः काकुविशिष्टस्य अर्थस्य व्यञ्जनया इति समन्वयः।

पदांशेषु यथा-

**न्यक्कारोऽह्ययमेव मे यदरयः तत्राप्यसौ तापसः**
**सोऽप्यत्रैव निहन्ति राक्षसकुलं जीवत्यहो रावणः।**
**धिक् धिक् शक्रजितं प्रबोधितवता किं कुम्भकर्णेन वा**
**स्वर्गग्रामटिकाविलुण्ठनवृथोच्छूनैः किमेभिर्भुजैः।।**[३०]

अत्र पदैकदेशसुप्सम्बन्धचनानां, तद्धितनिपातयोः, तिङ्कारक-शक्तीनां, कृतद्धितसमासोपसर्गाणां व्यञ्जना समुल्लसति इति लक्षणं समन्वितम्।

वर्णस्य रसव्यञ्जत्वं प्रतिपादयन् ध्वनिकारः निर्दिशति-

**शषौ सरेफसंयुक्तौ ढकरश्चापि भूयसा।**
**विरोधिनस्स्युः शृङ्गारे तेन वर्णा रसच्युतः।**
**त एव तु निवेश्यन्ते बीभत्सादौ रसे यदा।**
**तदा तं दीपयन्त्येव तेन वर्णा रसच्युतः।।**[३१]

तदनुसारं शून्यं वासगृहं विलोक्य शयनादुत्थाय इत्यादौ शृङ्गारस्य रसस्य च्युतिः दर्शिता जगन्नाथेन।[३२]

तथैव **टङ्कारध्वनिरार्यबालचरितैः** इत्यादिषु टकारस्य वीररसव्यञ्जकत्वं स्पष्टम्।

वाक्यस्य व्यञ्जक्त्वं यथा-

**एवं वादिनि देवर्षौ पार्श्वे पितुरधोमुखी।**
**लीलाकमलपत्राणि गणयामास पार्वती।।**[३३]

प्रबन्धस्य व्यञ्जकत्वं रामायणादौ इति लक्षणसमन्वयः।

एवं विश्वनाथलक्षणस्य सर्वत्र समन्वयः द्रष्टव्यः।

**विश्वनाथस्य व्यञ्जनालक्षणे विप्रतिपत्तयः-**

इदमपि विचारणीयम्-

विश्वनाथस्य व्यञ्जनालक्षणवृत्तिग्रन्थे सः लिखति-

**विरतासु अभिधाद्यासु शब्दबुद्धिकर्मणां विरम्यव्यापाराभावः इति नयेन अभिधालक्षणातात्पर्याख्यासु तिसृषु वृत्तिषु स्वं स्वमर्थं बोधयित्वा उपक्षीणासु यया अन्यार्थो बोध्यते सा शब्दस्य अर्थस्य प्रकृतिप्रत्ययादेश्च शक्तिः व्यञ्जन-ध्वनन-गमन-प्रत्यायनादि-व्यपदेशविषया व्यञ्जना नाम।**[३४]

इत्ययं ग्रन्थः चिन्तनीयः।

अत्र बहुवचनं विश्वनाथस्यैव मतेन न सङ्गतम्। तथाहि-

द्वितीयपरिच्छेदे एव

**तात्पर्याख्यां वृत्तिमाहुः पदार्थान्वयबोधने।**
**तात्पर्यार्थं तदर्थं च वाक्यं तद्बोधकं परे।।**[३५]

इति तेनैव परे इति कथनेन तात्पर्यशक्तेः निराकरणात् तन्मते अभिधालक्षणे एव शब्दशक्ती भवतः। एवं पूर्वापरविरोधः स्पष्टः। तथा लक्षणे अभिधाद्यासु इति बहुवचनमसङ्गतमेव। वृत्तिग्रन्थोऽपि विसंवदति इति अत्रापि दोषः इति **प्रथमः दोषः।**

व्यञ्जनायाः परिशिष्टार्थविषयकत्वेन अभ्युपगमात् अर्थस्य इयत्तायाः अनवधारणात् नियामकानामनुल्लेखनात् यत्किञ्चिदर्थस्य व्यङ्ग्यत्वेन अपादानप्रसङ्गात् **गतोऽस्तमर्कः** इत्यादौ लक्षणस्य न सङ्गतिः इति **द्वितीयः दोषः।**

एवं परिशीलनेन लाक्षणिकाभ्यामालंकारिकाभ्यां **विद्यानाथ-विश्वनाथाभ्यां कृतस्य व्यञ्जनालक्षणस्य अव्याप्तिदोषजुष्टत्वम्।**

तर्हि निर्दुष्टं लक्षणं किमिति चेत् उच्यते-

तदर्थ व्यञ्जनाभेदज्ञानमावश्यकम्-

**व्यञ्जना द्विधा-**

**अर्थसापेक्षा प्रथमा** यत्र वक्त्रादिवैशिष्ट्यादिनिमित्तिका यथा अविविक्षितवाच्या, विविक्षितवाच्या, च गृह्येते।

**अनिष्टस्य श्रुतिर्यद्वदापादयति दुष्टता।**
**श्रुतिदुष्टादिषु व्यक्तं तद्वदिष्टस्मृतिर्गुणम्।।**
**पदानां स्मारकत्वेऽपि पदमात्रावभासिनः।**
**तेन ध्वनेः प्रभेदेषु सर्वेष्वेवास्ति रम्यता।।**
**विच्छित्तिशोभिनैकेन भूषणेनैव कामिनी।**
**पदद्योत्येन कविना ध्वनिना भाति भारती।।**[३६]

इत्यादिना उक्तं व्यञ्जकत्वमपि संगृह्यते।

**अर्थनिरपेक्षा द्वितीया** यत्र नादवर्णचेष्टादिनिमित्तिका-

वक्तृबोद्धव्यादि-काव्यप्रकाशकारिकायां देशकालादेः इति **आदिग्रहणात् चेष्टादेः**[३७] इति चेष्टायामपि व्यञ्जना अङ्गीकृता।

यथा -

**द्वारोपान्तनिरन्तरे मयि तया सौन्दर्यसारश्रिया**
**प्रोल्लास्योरुयुगं परस्परसमासक्तं समासादितम्।**
**आनीतं पुरतः शिरोऽशुकमधः क्षिप्ते चले लोचने**
**वाचस्तत्र निवारितं प्रसरणं सङ्कोचिते दोर्लते।।**[३८]

इत्यादिषु व्यञ्जना सङ्गृह्यते।

सर्वत्रापि अन्यूनानतिक्तं लक्षणं वक्तव्यम्, तच्च लोचने सम्यक् प्रपञ्चितम्-

**अभिधातात्पर्यलक्षणाशक्तित्रयोपजनितार्थावगममूलजात-तत्प्रतिभासपवित्रितप्रतिपत्तृप्रतिभासहायार्थद्योतनशक्तिर्ध्वननव्यापारः** इति,[३९], अत्र ध्वननं नाम व्यञ्जना। एवं व्यञ्जनास्वरूपम् अभिहितम्।

एतस्य कोविदमात्रगम्यत्वात् अर्थशक्तिसजातीयत्वात् सरलतया प्रकारान्तरेण पूर्वोक्तलक्ष्येषु अनुगम्यमानम् अभिधादिशक्तिविजातीयं रागादिष्वपि प्रसज्यमानं लक्षणमुच्यते-

**मुख्यार्थबाधादिषु प्रयोजनार्थप्रतिपादकत्वं, नानार्थाकशब्द-स्थले अप्राकरणिकार्थालंकारव्यङ्ग्यप्रतिपादकत्वम्, अर्थ-शक्तिमूले व्यङ्ग्ये वक्तृवैशिष्ट्यादिनिमित्तिकान्यार्थप्रतिपादकत्वं, सङ्गीतनाट्यादिषु नादचेष्टावर्णादिनिमित्तिकं वा अर्थप्रतिपाद-कत्वं व्यञ्जना इति।**

एतेन व्यञ्जनायाः व्यापकत्वमागतम्।

तथा च वाच्यलक्ष्याद्यन्यार्थप्रतिपादकत्वं व्यञ्जना इति फलितम्।

लक्षणास्थले वाच्यलक्ष्यार्थान्यार्थप्रतिपादकत्वमस्तीति अविवक्षितवाच्यव्यञ्जनायामर्थात् लक्षणामूलव्यञ्जनायां समन्वयः, यथा-

**गङ्गायां घोषः** इत्यत्र प्रवाहतटरूपवाच्यलक्ष्यार्थान्यपावनत्वादि-प्रयोजनार्थप्रतिपादकत्वमस्तीति समन्वयः।

नानार्थकशब्दस्थले शब्दशक्तिमूलव्यञ्जनायां यथा-

**राजत्युमावल्लभः** इत्यत्र उमावल्लभनामकस्य राज्ञः वर्णनस्य प्राकरणिकतत्वेऽपि अप्राकरणिकशङ्करवर्णनरूपान्यार्थप्रतिपादकत्व-मस्तीति समन्वयः।

नानार्थकशब्दस्थले शब्दशक्तिमूलव्यञ्जनायां यथा-

**गतोऽस्तमर्कः** इत्यादौ वक्तृबोद्धव्यवैशिष्ट्येन सन्ध्यावन्दनं कुरु इति गुरूपदेशरूपान्यर्थप्रतिपादकत्वम् इति समन्वयः।

नादचेष्टादिषु-

**गीतादिशब्देभ्योऽपि रसाभिव्यक्तिरस्ति।**[४०]

इति ध्वनिकारवचनानुसारं गीतादिष्वपि व्यञ्जनाया विलासः प्रसिद्धः। यथा

**शिवरञ्जनी**सङ्गीतरागादीनां तत्पदाभिधेयान्यकरुणरसादिप्रति-पादकत्वमिति समन्वयः।

चेष्टावर्णादीनां न स्वातन्त्र्येण अर्थप्रतिपादकत्वं यद्यपि नास्ति तथापि विभावाद्यभिव्यक्ते रसे अनुकूलत्वेन अवस्थानमिति विज्ञेयम्।

**प्रक्रान्तलक्षणस्वीकारे विद्यानाथविश्वनाथलक्षणगतदोष-निरासनिरूपणम्-**

एवं विद्यानाथविश्वनाथलक्षणयोः अव्याप्तिदोषः एतल्लक्षण-स्वीकारे निरस्तः।

अत एव ध्वनिकारादिभिः व्यञ्जनालक्षणं तत्तत्प्रसङ्गेषु व्यञ्जनास्वरूपं विकीर्णतया प्रादर्शि। विद्यानाथस्य विश्वनाथस्य च व्यञ्जनालक्षणस्वरूपपरिज्ञाने मम्मटादीनां व्यञ्जनास्वरूपविषयज्ञाने साहाय्यकमाचरतः। अत एव तात्पर्यशक्तेः तात्पर्यार्थस्य वा व्यञ्जनायामेव अन्तर्भावयति विद्यानाथः।

**तात्पर्यार्थोऽपि व्यङ्ग्यार्थ एव।**[४१] इति।

यथा लौकिके गोस्वामिनः गोपालकं स्वस्य भृत्यं प्रति गां पश्य इति आदेशवाक्ये चक्षुर्धेनुसंयोगो न विवक्षितं गोसेवां कुरु इति खलु विवक्षितम्। स च अर्थः कथमागतः ऋते व्यञ्जनायाः। तथा च विवक्षित एव तात्पर्यार्थः। तस्य बोधनक्षमता व्यञ्जनायामेव अस्ति, न तु अभिहितान्वयवादिनां कुमारिलभट्टानुयायिनां वाक्यार्थमात्रबोधिकायां तात्पर्यशक्तौ।

ध्वनिकारोऽपि कथयति यथा-

**पौरुषेयाणि च वाक्यानि प्राधान्येन पुरुषाभिप्रायमेव प्रकाशयन्ति। स च व्यङ्ग्य एव न तु अभिधेयः।**[४२]

एवं विविक्षितः अभिप्रायविशेषः, स एव तात्पर्यार्थः, तात्पर्यार्थ एव व्यङ्ग्यार्थ इति विद्यानाथस्य हृदयम्। अत एव मम्मटः-

**तात्पर्यार्थोऽपि केषुचित्।**[४३]

इति अत्र अरुचिं दर्शयितुं केषुचित् इति उक्तवान्। तत् परकीयं मतम् अभिहितान्वयवादिनां मते तात्पर्यशक्तिं लक्षयति अभिनवगुप्तः-

**अभिधान्यथानुपपत्तिसहायार्थावबोधनशक्तिः तात्पर्य-शक्तिः।**[४४] इति।

या तात्पर्यशक्तिः सा व्यङ्ग्यबोधिका न भवति, इति व्यङ्गयार्थबोधनक्षमा व्यञ्जना स्वीकार्या एव इति व्यञ्जनास्थापनावसरे उपयोक्तुमेव तत्सूत्रेण द्वितीयोल्लासे सङ्केतः कृतः।

तथा च संक्षेपतः-

**लक्ष्यभिन्नविवक्षितार्थप्रतिपादकत्वं व्यञ्जना।**

निमित्तं पुरस्कृत्य प्रकारान्तरेण शक्तीनां लक्षणानि यथा-

**समयनिमित्तकमर्थप्रतिपादकत्वमभिधा।**

**मुख्यार्थबाधादिनिमित्तकमर्थप्रतिपादकत्वं लक्षणा।**

**वक्तृवैशिष्ट्यादिनिमित्तकमर्थप्रतिपादकत्वं व्यञ्जना।**

इति शक्तित्रयस्य इमानि लक्षणानि ज्ञेयानि।

**वस्त्वलंकाररसव्यङ्ग्यानां व्यञ्जनालक्षणस्य लक्ष्येषु सामान्येन समन्वयः-**

काव्येषु वस्त्वलंकाररसरूपेण व्यङ्ग्यस्य त्रैविध्यात् व्यञ्जनाया अपि त्रैविध्यम्-

वस्तुव्यञ्जना यथा -

रसालंकारभिन्नं विधिनिषेधरूपं वा वर्णनीयं वस्तु-

**भ्रम धार्मिक विस्त्रब्धः स शुनकोऽद्य मारितस्तेन।**
**गोदावरीनदीकूललतागहनवासिना दृप्तसिंहेन।।**[४५]

अत्र भ्रमणं कुरु इति वाच्येन कविविवक्षितः अभिसारिकायाः कविनिबद्धायाः विवक्षितो वा भ्रमणं मा कुरु इति अर्थः निषेधः व्यज्यते। अत्र निषेधः वस्तुरूपः।

अलंकारव्यञ्जना यथा-

**जलकेलितरलमुक्तपुनः पिहितराधिकावदनः।**
**जगदवतु कोकयूनोः विघटनसंघटनकौतुकी**
**कृष्णः।।**[४६]

अत्र राधिकावदनस्य पिधानापिधानाभ्यां कोकयूनोः विघटन-संघटनकारित्ववर्णनेन राधिकावदनमेव चन्द्रः इति कविविवक्षितः अर्थः रूपकालंकारः व्यज्यते।

रसव्यञ्जना यथा-

**भूयो भूयस्सविधनगरीरथ्यया पर्यटन्तं**
**साक्षात्कामं नवमिव रतिर्मालती माधवं यत्।**
**दृष्ट्वा दृष्ट्वा भवनवलभीजालवातायनस्था**
**गाढ़ोत्काण्ठाप्रणयलुलितैरङ्गकैस्ताम्यतीव।।**[४७]

अत्र मालती स्थायिनः रत्याख्यस्य आश्रयः, माधवः मालती-निष्ठायाः रतेः आलम्बनम्, माधवस्य सविधरथ्यापर्यटनमुद्दीपनम्, माधवदर्शनमनुभावः, उत्कण्ठादयः व्यभिचारिणः तेषां परस्परसंवलनात् तन्निष्ठा रतिः सहृदयैकगोचरा शृङ्गाररसतां गता कविविवक्षिता।

एवं त्रिष्वपि विवक्षितार्थप्रतिपादकत्वरूपा व्यञ्जना समुल्लसति इति लक्षणसमन्वयः।

**व्यञ्जनायाः सार्वत्रिकत्वम्**

व्यञ्जना लोके काव्ये च समस्ति। काव्यविषयिणी व्यञ्जना चमत्कारिणी लोके च न तथा। काव्येषु नाट्याङ्गेषु च व्यञ्जना शब्दशक्तिः, अर्थशक्तिः, अभिव्यज्यमानरसानुकूलाभिव्यञ्ज-कत्वशक्तिः। लोके च व्यावहारिकी शक्तिः केवलमभिप्रायं सूचयति। अत एव न चमत्कारकारिणी, यथा पुत्रस्ते जातः, इति वाक्यश्रवणेन श्रोतुः हर्षातिरेकः यद्यपि व्यज्यते किन्तु तस्य लौकिकत्वात् परेषां चमत्कारं न जनयति, तदीयानामानन्दो भवतु नाम, स च न चमत्कारवाच्यः उदासीनानां तु उपेक्षाभाव एव। किन्तु लोकेऽपि व्यञ्जना अस्तीति सिद्धम्। अत एव तान्येव स्थलानि दर्शयित्वा व्यञ्जनाशक्तिं स्थापयतां व्यञ्जनावादिनां व्यञ्जनायाः सार्वत्रिकत्वमुररीकृत्य दर्शनान्तरानुयायिभिरपि व्यञ्जना स्वीकार्या एव इति सिद्धान्तितः।

**अनुमानप्रस्थानभूमिका-**

एवं स्थिते लौकिकालौकिकव्यञ्जना सामान्यतया एकरूपा एव इति चमत्काराचमत्कारजनकतावैलक्षण्येन भेदसत्त्वेऽपि लोचने निमील्य लोके धनं ते दास्यामि इति वाक्यं श्रुतवतः हर्षः व्यङ्ग्यरूपोऽपि तस्मिन् पुरुषे पक्षे नेत्रविस्फारादिना हेतुना तदीयहर्षं साध्यमनुमिनोति लोकः इति लौकिकव्यञ्जना अनुमाने अन्तर्भावयितुं शक्यते। एवमेव काव्यार्थधीजन्यस्य व्यङ्ग्यस्य कमपि हेतुं परिकल्प्य अनुमेयता साधयितुं शक्यते। अत्र अपि अनुमानं लसत्येव, एतत् लौकिकानुमानात् विलक्षणमिति काव्यानुमानमित्युच्यते।

पूर्वोक्तं वस्त्वलंकाररसात्मकम् एतत्रितयमपि अनुमानगम्यमेव भवति इति अनुमानप्रस्थानवादिनः प्रत्यवतिष्ठन्ते। तेषु अग्रगण्यः महिमभट्टः। तेन व्यक्तिविवेकः रचितः। यद्यपि श्रीशङ्कुकस्य रसानुमितिवादः अस्ति, यत्र स रसः अनुमेय एव इति सुस्थापयति। परं नाट्यरस एव। तथैव श्रव्यकाव्येष्वपि वस्त्वलंकाररसानामपि व्यङ्ग्यानामनुमाने अन्तर्भावयितुमेव व्यक्तिविवेके प्रतिजानाति महिमा।

**अनुमानेऽन्तर्भावं सर्वस्यैव ध्वनेः प्रकाशयितुम्।**

**व्यक्तिविवेकं कुरुते प्रणम्य महिमा परां वाचम्।।**[४८]

तस्य इयं युक्तिः –व्यक्तिलक्षणं स्वकीयमुक्त्वा वाच्यप्रतीयमानयोः व्यङ्ग्यव्यञ्जकभावः न समन्वेति इति।

**व्यक्तिलक्षणं भेदाश्च** यथा–

**सतः असतः एव वा अर्थस्य प्रकाशमानस्य सम्बन्धस्मरणा-नवेक्षिणा प्रकाशकेन सहैव प्रकाशविषयतापत्तिः अभिव्यक्तिः।**[४९] इति।

सा च द्विधा यथा सदभिव्यक्तिः, असदभिव्यक्तिः इति।

1. सदभिव्यक्तिः त्रिधा–

क. उत्पत्तिः अथवा परिणतिः यथा दधिक्षीरन्यायेन।

क्षीरमेव आतञ्चादिना दधिरूपेण परिणमति।

ख. अभिव्यक्तिः

आविर्भूतस्य उत्पन्नस्य कुतश्चित् प्रतिबन्धात् प्रकाशमानस्य प्रकाशकेन उपसर्जनीकृतात्मना सहैव प्रकाशो द्वितीयः।

यथा–घटप्रदीपन्यायेन

तथा च उक्तम्–

**स्वज्ञानेनान्यधीहेतुः सिद्धेऽर्थे व्यञ्जको मतः।**

**यथा दीपोऽन्यथाभावे को विशेषोऽस्य कारकात्।।**[५०] इति।

ध्वनिकारेणापि अभिव्यक्तिविषये **स्वरूपं प्रकाशयन्नेव परार्थावभासनो व्यञ्जकः इत्युच्यते यथा प्रदीपो घटादेः**[५१] इति।

ग. संस्कारः–

तस्यैव अनुभूतपूर्वस्य संस्कारात्मनान्तर्विपरिवर्तिनः कुतश्चिद-व्यभिचारिणोऽर्थान्तरात् तत्प्रतिपादकाद्वा संस्कारप्रबोधमात्रं तृतीया।

सा च त्रिधा अनुमानगम्या, आलेख्यगम्या, शब्दगम्या इति।

अनुमानगम्या यथा धूमादग्नेः प्रतीतिः।

आलेख्यप्रख्यगम्या यथा–चित्रतुरगन्यायेन, पुस्तकप्रतिबिम्बा-दिभ्यः तुरगाद्यभिव्यक्तिः।

शब्दः यथा–शब्दाच्च गवादेः। गोशब्दश्रवणेन सास्नादिमत्त्वस्य पिण्डविशेषस्य ज्ञानम्।

2. असदभिव्यक्तिः यथा–अर्कालोकादौ इन्द्रधनुषः अभिव्यक्तिः।

एवं सदभिव्यक्तेः पञ्च, प्रथमद्वितीययोः एकैकम्, संस्कारस्य त्रयमिति कृत्वा आहत्य पञ्च भेदाः।

असदभिव्यक्तेः एकः भेदः इति व्यक्तेः षट् भेदाः।

अत्र अभिव्यक्तिः नाम व्यक्तिरेव इति ग्राह्या।

**वाच्यप्रतीयमानयोः लक्ष्यमाणा व्यक्तिः का? इति विचारः–**

तत्र असदभिव्यक्तेः वाच्यप्रतीयमानयोः अनुभवगोचरत्वात् सत्त्वाच्च प्रसङ्ग एव नास्ति।

वाच्यप्रतीयमानयोः सदभिव्यक्तेः प्रथमा व्यक्तिः न भवति, यतः क्षीरं दध्यादिना परिणतं सत् चक्षुरादीन्द्रियगोचरं भवति, तथा वाच्यात् प्रतीयमानस्य रसादेः इन्द्रियगोचरता नास्ति। अतः **प्रथमलक्षणम् असम्भवदोषग्रस्तम्।**

पुनः अभिव्यक्तिनाम्ना प्रसिद्धा व्यक्तिरपि न सम्भवति, यथा वाच्यप्रतीयमानयोः व्यङ्ग्यव्यञ्जकभावः नितरां नास्ति यतः तयोः संलक्ष्यक्रमव्यञ्जनायामसंलक्ष्यक्रमव्यञ्जनायां च क्रमस्य अङ्गीकारात्। वस्तुतः व्यङ्ग्यव्यञ्जकभावः सहभावमपेक्षते। परं वाच्यप्रतीयमानयोः प्रथमं वाच्यार्थोपस्थितिः तदनु प्रतीयमानस्य इति क्रमः अस्त्येव। क्रमभावे सति न व्यङ्ग्यव्यञ्जकभावः इति **द्वितीयव्यक्तिलक्षणस्य असङ्गतिः।**

**महिमभट्टेन घटप्रदीपन्यायेन अभिव्यक्तिस्थले प्रथमक्षणेऽपि सहभावः अपेक्षित इति कथितम्। आनन्दवर्धनेन तु तस्मिन्नेव द्वितीयक्षणे सहभावः अस्ति किल, तमेव आदृत्य व्यङ्ग्यव्यञ्जकभावः अस्त्येव इति कथितमिति विवेकः।**

संस्काररूपे द्वितीये अभिव्यक्तिलक्षणे वाच्यप्रतीयमानयोः व्यङ्ग्यव्यञ्जकभावः आलेख्यादिषु इव न भवति इति सर्वविदितम्। चित्रतुरगन्यायेन नटादौ रसप्रतीतिः इति शङ्कुकस्य मतस्य निराकरणात्।

तस्यैव तृतीयस्य शब्दादर्थप्रतीतिः वाच्यस्यैव भवति न व्यङ्ग्यस्य इति तदपि लक्षणमसङ्गतम्।

तर्हि व्यक्तिलक्षणं पारिशेष्यात् अनुमानस्यैव संगच्छते। तथा व्यक्तिः अनुमानमेव।

एवं युक्त्या निश्चित्य महिमभट्टः काव्यानुमितिं लक्षयति यथा–

**वाच्यस्तदनुमितोवार्थः यत्रान्तरं प्रकाशयति।**

**सम्बन्धतः कुतश्चित् सा काव्यानुमितिरित्युक्ता।।**

इति।[५२]

तथा च काव्यानुमानं लौकिकानुमानात् तार्किकानुमानाद्वा भिन्नमेव, तेन रसालंकारवस्तुव्याङ्ग्याः अनुमीयन्ते परं ते व्यङ्ग्या न भवन्ति अनुमेया एव।

**अनुमानस्वरूपम्-**

व्यङ्ग्यस्य अनुमेयत्वसाधनाय अनुमानस्वरूपं ज्ञातव्यम्-

अनुमितिकरणमनुमानम्।

परामर्शजन्यं ज्ञानमनुमितिः।

व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्शः। यथा वह्निव्याप्यधूमवानयं पर्वतः इति ज्ञानं परामर्शः।

तज्जन्यं पर्वतो वह्निमान् इति ज्ञानमनुमितिः।

यत्र यत्र धूमः तत्र तत्र वह्निः इति साहचर्यनियमो व्याप्तिः।

व्याप्यस्य पर्वतादिवृत्तित्वं पक्षधर्मता।

तथा च लिङ्गपरामर्शः अनुमानम्। इति अनुमानस्वरुपम्।

**अनुमानस्य द्वैविध्यम्-**

अनुमानं द्विविधम्- स्वार्थं परार्थं च।

स्वार्थं स्वानुमितिहेतुः।

तथाहि स्वयमेव भूयो दर्शनेन यत्र यत्र धूमस्तत्र तत्र अग्निरिति महानसादौ व्याप्तिं गृहीत्वा पर्वतसमीपं गतः, तद्गते चाग्नौ सन्दिहानः पर्वते धूमं पश्यन् व्याप्तिं स्मरति यत्र यत्र धूमः तत्र अग्निरिति। तदनन्तरं वह्निव्याप्यधूमवानयं पर्वतः इति ज्ञानमुत्पद्यते। अयमेव लिङ्गपरामर्श इत्युच्यते। तस्मात् पर्वतो वह्निमानिति ज्ञानमनुमितिरुत्पद्यते, तदेतत् स्वार्थानुमानम्।

यत्तु स्वयं धूमादग्निमनुमाय परं प्रति बोधयितुं पञ्चावयववाक्यं प्रयुज्यते तत्परार्थानुमानम्- प्रतिज्ञा-हेतूदाहरणोपनयनिगमनानि पञ्चावयवाक्यानि। यथा-

पर्वतो वह्निमान् इति प्रतिज्ञा। धूमवत्वात् इति हेतुः। यो यो धूमवान् स स वह्निमान् यथा महानस इत्युदाहरणम्। तथा चायम् इति उपनयः। तस्मात्तथेति निगमनम्। अनेन प्रतिपादिताल्लिङ्गात्परोऽपि अग्निं प्रतिपद्यते।[५३]

तस्य एव संक्षेपतः त्रिरूपाल्लिङ्गादनुमानं भवतीति फलितोऽर्थः।

**त्रिरूपं लिङ्गं नाम पक्षसत्त्वसपक्षसत्त्वविपक्षव्यात्तत्व-विशिष्टम्।**[५४]

**काव्यानुमानं परार्थानुमानम्-**

काव्यानुमानं तु परार्थानुमानमेव स्वीक्रियते। यतः कविः सहृदयान् प्रति प्रतीयमानं वस्त्वलंकाररसरूपमर्थं बोधयति।

अनुमानप्रकारः एवं भवति।

पक्षः साध्यः हेतुः इति। पर्वतो वह्निमान् धूमात् इत्यत्र पर्वतः पक्षः वह्निः साध्यः धूमः हेतुः।

प्रकृते गोदानदीतीरं पक्षः भीरुभ्रमणायोग्यता साध्यम्, सिंहवत्त्वात् इति हेतुः।

अत्र गोदानदीतीरं भीरुभ्रमणायोग्यम् इति प्रतिज्ञा, सिंहवत्त्वात् इति हेतुः तथा चेदं सिंहवत्त्ववत् तस्मात् तथा भीरुभ्रमाणायोग्यम् इति परार्थानुमनम् इति समन्वयः।

एवं प्रतीयमानं यदस्ति भ्रमणनिषेधः तीरस्य भीरुभ्रमणायोग्यता सिंहोपलब्धिरूपेण हेतुना साध्यते इति लक्षणसमन्वयः।

**काव्यानुमानस्य तार्किकानुमानात् वैलक्षण्यम्-**

परार्थानुमाने उदाहरणमपेक्ष्यते किल अत्र उदाहरणं किमिति चेत् उच्यते-

वस्तुतः हेतुः साध्यश्च उच्येते चेदेव अनुमितिः जायते उदाहरणस्य आवश्यकाता नास्ति।

तथाचोक्तम्-

**तद्भावहेतुभावौ हि दृष्टान्ते तदवेदिनः।**
**ख्याप्येते विदुषं वाच्यो हेतुरेव हि केवलः।।**[५५]

एवं तार्किकानुमानात् काव्यानुमानं भिन्नमिति सिद्धम्।

**प्रतीयमानवस्त्वलंकाररसानामनुमेयत्वनिरूपणम्-**

प्रतीयमानस्य वस्तुनः अनुमेयत्वं यथा-

**भ्रम धार्मिक** इत्यादौ भ्रमणनिषेध व्यङ्ग्यः इति निरूपितमेव।

प्रतीयमानस्य प्रतीयमानालंकारस्य अनुमानगम्यत्वं यथा-

अलंकारव्यङ्ग्यस्य अनुमेयत्वं यथा-

**जलकेलीत्यत्र**

राधिकावदनमेव चन्द्रः इति रूपकम्, तच्च प्रतीयमानं तच्च अनुमानेन साध्यते यथा-

रधिकावदनं चन्द्रः इति (रूपकम्) इति प्रतिज्ञा। आत्मदर्शना-दर्शनाभ्यां चक्रवाकविघटनसंघटनकारित्वात् इति हेतुः। विदुषां केवलस्य हेतोरेव परार्थानुमानं जायते एव इति कथितचरमेव। इति राधिकावदनमेव चन्द्र एव इति रूपकमनुमीयते।

अत्र श्लोके राधिकावदनं पक्षः, चन्द्रः इति साध्यम्, आत्मदर्शनादर्शनाभ्यां कोकयूनोः संघटनविघटनकारित्वात् इति हेतुः।

इति अलंकारस्य अनुमेयत्वम् इति लक्षणसमन्वयः।

रसस्य अनुमेयत्वं यथा-

**भूयो भूयस्सविधनगरी .....** इत्यादौ

या मालतीनिष्ठा रतिः व्यङ्ग्या। सा च अनुमीयते यथा–

मालती माधवविषयकरतिविशिष्टा इति प्रतिज्ञा। जालवातायानात् पुनः पुनः तद्दर्शनजनितगाढोत्कण्ठादिमत्त्वात् इति हेतुः। पूर्वोक्तसरण्या अनुमितिज्ञानम्।

अत्र मालती पक्षः, तन्निष्ठा रतिः साध्या, तद्दर्शनादिः हेतुः इति लक्षणसमन्वयः।

**व्यञ्जनाभेदनिराकरणपूर्वकं व्यञ्जनायाः अनुमानत्वसाधनम्–**

व्यक्तिविवेकाकाररस्तु महता संरम्भेण लक्षणायाः शब्दशक्तित्वं निराकरोति यथा–

एकत्र विद्यमानानां शक्तीनामन्योन्यानपेक्षप्रवृत्तित्वाप्रकृतपौर्वापर्य–युगपत्स्वकार्यकारित्वनियमं वह्न्यादौ उदाहृत्य शब्दे एका एव शक्तिः इति प्रतिपाद्य लक्षणां शब्दशक्तिं निरस्तवान्। तस्य मते लक्ष्यार्थोऽपि अनुमेय एव। तेन अविवक्षितवाच्यव्यञ्जना निरस्ता। तस्याः द्वौ भेदौ अपि निरस्तौ।

शब्दशक्तिमूलव्यञ्जनापि उक्तनयेन शब्दे अभिधैव शक्तिरस्ति, व्यञ्जना नास्तीति निरस्ता।

अर्थशक्तिमूलव्यञ्जना अनुमानमेव इति प्रदर्शितपूर्वा।

तदनुसारं ध्वनिकारस्य उदाहरणानि सर्वाण्यपि काव्यानुमेयपरतया व्याख्यातानि।

तदनन्तरवर्तिभिस्तु तेषां कतिपयेषां खण्डनं विधाय पुनः व्यञ्जना प्रतिष्ठापिता। यथा–

तदनुसारम् अनुमानखण्डनं दिङ्मात्रं प्रदर्श्यते।

**काव्यानुमानखण्डनम्–**

वस्तुव्यङ्ग्यस्य अनुमेयत्वं न भवितुमर्हति।

अनुमानं नाम पक्षसत्त्वसपक्षसत्त्वविपक्षव्यावृत्तत्वविशिष्टात् लिङ्गात् लिङ्गिनो ज्ञानमिति इति पूर्वं प्रतिपादितम्।

गोदावरीतीरं भीरुभ्रमणायोग्यं सिंहवत्त्वात् इति अनुमानेन व्यङ्ग्यार्थस्य भ्रमणनिषेधस्य अनुमेयत्वं साधितं यद्यपि तथापि तत्र हेतुः व्यभिचरितः। यतः अत्र भीरुरपि गुरोः प्रभोर्वा निर्देशेन प्रियानुरागेण अन्येन एवम्भूतेन हेतुना सत्यपि भयकारणे भ्रमति इति व्यभिचारी हेतुः, तेन अनैकान्तित्वात् अनुमानं न भवितुमर्हति। अत्र हेतुः विरुद्धः। यथा–शुनो बिभ्यदपि वीरत्वेन अरण्ये सिंहात् न बिभेति इति। एवं हेतोः विपक्षव्यावृत्त्यभावात् अनुमानगम्यत्वं व्यङ्ग्यस्य न सम्भवति। अपि च असिद्धः हेतुः, अत्र हेतुः प्रत्यक्षेण वा अनुमानेन वा न निश्चितः अपि तु वचनात्। न हि वचनस्य प्रामाण्यमस्ति इति। अतः वस्तु व्यङ्ग्यं कदापि अनुमेयं न भवितुमर्हति। इत्येवं रूपेण मम्मटेन पञ्चमोल्लासे स्पष्टं प्रत्यपादि।

**अलंकारव्यङ्ग्यस्य अनुमेयत्वमपि न शक्यम्–**

जलकेलीत्यत्र सः आत्मदर्शनादर्शनाभ्यां कोकविघटनसंघटनकारी स चन्द्र एव इति वक्तुं न शक्यते। दण्डादिना उत्त्रासकत्वेऽपि संघटनविघटनकारित्वं भवतीति हेतोः विपक्षव्यावृत्त्यभावात् रूपकमनुमीयते इत्यपि साधयितुं न शक्यते।

**रसव्यङ्ग्यस्य अनुमेयत्वमसम्भवम्–**

भूयो भूयः इत्यत्रापि भूयोभूयोदर्शनादिना अनुमीयमाना रतिः मालतीनिष्ठा रतिरेव। न तु सहृदयचर्व्यमाणा रतिः शृङ्गारतां गता। अनुमीयमानस्य तस्य रसत्वेन ग्रहणं नास्ति। **यदनुमीयते सा रसो न भवति, या चर्व्यते सा नानुमीयते** इति रसस्य अनुमेयत्वं नास्त्येव। अत्र पूर्वोक्तं लिङ्गलक्षणमन्वितं भवतु, तेन लिङ्गेन लिङ्गिनो रसस्य ज्ञानं न रसपदवाच्यम्, तस्य अनुकार्यनिष्ठत्वात्।

अत एव नीलकण्ठप्रकाशिकायां **गीर्वाणगुरुणापि अशक्यनिवारेयं व्यञ्जना** इति उदघोषि नैयायिकशिरोमणिना इति शम्।

**।। इति शिवम् ।।**

## सन्दर्भाः


१. ल. ध्व. गुरुकृपाव्याख्या–मङ्गलश्लोकः

२. विदुरनीतेः बालबोधिनी

३. म. भा. उद्योगपर्व–प्रजागरपर्व–विदुरनीतिः

४. का. मी. २–पु.–२३, २४

५. ल. ध्व. लो. गु. कृ.–भूमिकायाम्

६. ध्वन धातुः पा. धा. पा. ११७९

७. भौवादिकात् ध्वनधातोः खनि–कव्यज्यसि–वस–वनि–सनि–ग्रन्थचलिभ्यश्च उणादिसूत्रपाठे ४–१३९ इति औणादिकः इ प्रत्ययः।

८. कर्तरि कृत् पा. सू. ३–४–८७

९. उणादयो बहुलम् पा. ३–३–१

१०. संज्ञासु धातुरूपाणि प्रत्ययाश्च ततः परे।
कार्याद्विद्यादनूबन्धमेतच्छास्त्रमुणादिषु।।

११. तत्रैव।

१२. ध्व. लो. लोचनम्–पृ १४२

१३. पा. धा. १५५२

१४. पा. सू. ३–३–१०७

ISSN 2348-7828

१५. अजाद्यतष्टाप् पा. सू. ४-१-४

१६. पा. ३-३-१९

१७. ध्व. लो. लो. पु. ६०

१८. का. प्र. २-कारिका-१८ पु. ६३ वृत्तिग्रन्थे

१९. का. प्र. २-१५ कारिका सू-२३ पु. ५८

२०. का. प्र. २-कारिका-१९

२१. का. प्र. ३-कारिका-२१, २२ सू. ३७ पु. ७२

२२. प्र. रु. पु. ३५ काव्यप्रकरणे

२३. तत्रैव का. १२ पु. ३५

२४. तत्रैव का. १३ पु. ३७

२५. तत्रैव का. १४ पु. ३९

२६. तत्रैव पु. १४९ रसनिरूपणे

२७. सा. द. २-का-१२, १३ पु. ३९

२८. तत्रैव २-पु. ४३

२९. तत्रैव २-पु. ४५

३०. ध्व. लो. ३-पु. ३८०

३१. तत्रैव ध्व. ३-क-३, ४ पु. ३२८

३२. र. गं. १-पु. २८६

३३. ध्व. लो. २-पु. २६८

३४. सा. द. २-पु. ४०

३५. सा. द. २-पु. ४६

३६. ध्व. ३-१-परिकरश्लोकाः पु. ३२६, ३२७

३७. का. प्र. ३-पु. ८८

३८. तत्रैव का प्र. श्लो. २२ पु. ८८

३९. ध्व. लो.-लोचने पु. ६०

४०. ध्व. लो. ३-पु. ४४६

४१. प्ररु. का. प्र. पु. १९

४२. ध्व. लो. ३-पु. ४७९

४३. का. प्र. -२-कारिका -६ सू. ७

४४. ध्वलो. लोचने-पु. ६०

४५. ध्व. लो. लोचन-पु. ५२

४६. सा. द. ५-पु. १६५

४७. का. प्र.-४-श्लो. १०६

४८. व्य. वि.-मं. श्लो.

४९. तत्रैव प्र. वि. पु. ८० ५०. तत्रैव

५१. ध्व लो. ३-पु. ४७१

५२. व्य. वि. १-का. २५ पु. १११

५३. त. सं-अनु. ख- पु. २६ ५४. सा. द. ५-पु. १६४

५५. व्य. वि. १-पु. ६९।

## सन्दर्भग्रन्थाः


१. लघुध्वन्यालोकः, बालबोधिनीव्याख्यासहितः, गुल्लपल्लि श्रीरामकृष्णमूर्तिः, वि. आर्. पब्लिकेशन्स्, तिरुपतिः-२००५।

२. विदुरनीतिः, बालबोधिनीव्याख्यासहिता श्रीसोमञ्चि बलरामकृष्णशास्त्री, अप्रकाशिता मातृका।

३. काव्यमीमांसा, राजशेखरः।

४. वैयाकरणसिद्धान्तकौमुदी, भट्टोजीदीक्षितः

५. उणादिकोशः, डॉ.वि.मुरलीधरशर्मा, राष्ट्रियसंस्कृतविद्यापीठम् तिरुपतिः।

६. प्रतापरुद्रीयम्, मद्रपुरीसंस्कृतविद्यासमितिः-१९७०।

७. काव्यप्रकाशः, नागेश्वरीटिकोपेतः, चौखम्बाप्रकाशन्-२०१०

८. साहित्यदर्पणः, मोतीलाल् बनारसीदास्-१९७७।

९. रसगङ्गाधरः, पं. मदनमोहनझा, चौखम्बाविद्याभवन्-१९७०

१०. धन्यालोकः, आचार्यजगन्नाथपाठकः, चौखम्बाविद्याभवन्-१९८२

११. व्यक्तिविवेकः, आचार्य रेवाप्रसादद्विवेदी, चौखम्बा संस्कृत संस्थान, वाराणासी-१९८०

१२. तर्कसंग्रहः, न्यायबोधिनीसहितः, निर्णयसागरमुद्रणालयः बोम्बई-१९११

१३. साहित्यवल्लरी, डॉ. एन्. लक्ष्मीनारायणभट्टः,
महालक्ष्मी.एम्, अमृतम् २-३९, डी. ४, षष्ठः उपमार्गः सुब्रह्मण्यनगरम् सन्तेकट्टे-पोस्ट्, पुत्तूरुग्रामः, उडुपि-५७६१०४, कर्णाटकराज्यम्-२०११

१४. नीलकण्ठप्रकाशिका तर्कसंग्रहव्याख्या।



*आचार्यः जी. यस्. आर. कृष्णमूर्तिः*

*राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः*